दानवानेव शक्नोति संहतान् भेदितुं परान् ॥
यद्यप्यक्षुब्धा गम्भीराः पुरुषाः सागरोपमाः ।
न यच्छन्ति तथाप्येते जायन्ते पक्षपातिनः ॥
अन्यत्रापि कृतं दानं करोत्यन्यं तथा वशे ।
उपायेभ्यः प्रशंसन्ति दानं श्रेष्ठतमं जनाः ॥
दानं श्रेयस्करं श्रेष्ठं दानं श्रेष्ठकरं परम् ।
दानवानेव लोकेषु पुत्त्रत्वे म्रियते सदा ॥
न केवलं दानपरा जयन्ति
भूर्लोकमेकं पुरुषाः सुवीराः ।
जयन्ति ते राजसुरेन्द्रलोकं
सुदुर्जयं यद्विबुधाधिवासम् ॥”
इति मात्स्ये २२४ अध्यायः ॥ * ॥
मत्स्य उवाच ।
“न शक्या ये वशे कर्त्तुमुपायत्रितयेन तु ।
दण्डेन तान् वशान् कुर्य्यात् दण्डो हि वशकृन्नृणाम् ॥
सम्यक् प्रणयनं तस्य तथा कार्य्यं महीक्षिता ।
धर्म्मशास्त्रानुसारेण सुसहायेन धीमता ॥
तस्य सम्यक्प्रणयनं तथा कार्य्यं महीक्षिता ।
वानप्रस्थांश्च धर्म्मज्ञान् निर्म्ममान् निष्परिग्रहान् ।
स्वदेशे परदेशे च धर्म्मशास्त्रविशारदान् ।
समीक्ष्य प्रणयेद्दण्डं सर्व्वं दण्डे प्रतिष्ठितम् ॥
आश्रमी यदि वा वर्णी पूज्यो वाथ गुरुर्महान् ।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्म्मे न तिष्ठति ॥
अदण्ड्यान् दण्डयेद्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
इह राज्यपरिभ्रष्टो नरकं प्रतिपद्यते ॥
तस्माद्राजा विनीतेन धर्म्मशास्त्रानुसारतः ।
दण्डप्रणयनं कार्य्यं लोकानुग्रहकाम्यया ॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति ॥
बालवृद्धातुरयतिद्विजस्त्रीविधवाजनः ॥
सर्व्वे बलिष्ठा भक्षेरन् यदि दण्डं न पातयेत् ॥
देवदैत्योरगगणाः सिद्धभूतपतत्त्रिणः ।
उपक्रमेयुर्म्मर्य्यादां यदि दण्डं न पातयेत् ॥
एष ब्रह्माभिशापेषु सर्व्वप्रहरणेषु च ।
सर्व्वविक्रमकोपेषु व्यवसाये च तिष्ठति ॥
पूज्यन्ते दण्डिनो देवा न पूज्यन्ते त्वदण्डिनः ।
न ब्रह्माणं विधातारं न पूषार्य्यमणावपि ॥
य एते मानवाः केचित् प्रशान्ताः सर्व्वकर्म्मसु ।
रुद्रमग्निञ्च शक्रञ्च सूर्य्याचन्द्रमसौ तथा ।
विष्णुं देवगणांश्चान्यान् दण्डिनः पूजयन्ति च ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः ॥
राजदण्डभयादेके पापाः पापं न कुर्व्वते ।
यमदण्डभयादेके परस्परभयादपि ॥
एवं हि सांसिद्धिके लोके सर्व्वं दण्डे प्रतिष्ठितम् ।
अन्धे तमसि मज्जेयुर्यदि दण्डं न पातयेत् ॥
तस्मात् दण्डो दमयति अदण्ड्यान् दण्डयत्यपि ।
दमनाद्दण्डनाच्चैव तस्मात् दण्डं विदुर्बुधाः ॥
दण्डस्य भीतैस्त्रिदशैः समेतै-
र्भागो धृतः शूलधरस्य यज्ञे ।
भवस्य पुत्त्रं ध्वजिनीपतिश्च
वरं शिशूनाञ्च भयात्तु दुष्टम् ॥”
इति मात्स्ये १६६ अध्यायः ॥
सामभेदौ तत्तच्छब्दे द्रष्टव्यौ ॥

शत्रुघ्नः, पुं, (शत्रून् हन्तीति । हन् + मूलविभुजादित्वात् कः । यद्वा, अमनुष्यकर्त्तृकेऽपि चेत्यपि शब्दात् कतघ्न शत्रुघ्नादयः सिद्धा इति दुर्गसिंहः ।) श्रीरामस्य भ्राता । तत्पर्य्यायः । शत्रुमर्द्दनः २ । इति शब्दरत्नावली ॥ स तु सुमित्रया हुतोच्छिष्टभोजनादसावि । यथा,—
“निष्ठां गते दत्त्रिमसभ्यतोषे
विहित्रिमे कर्म्मणि राजपत्न्यः ।
प्राशुर्हुतोच्छिष्टमुदारवंश्या-
स्तिस्रः प्रसोतुं चतुरः सुपुत्त्रान् ॥
कौशल्ययासावि सुखेन रामः
प्राक् केकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्ट-
मेका सुमित्रा सह लक्ष्मणेन ॥”
इति भट्टिकाव्ये १ सर्गः ॥
(अयं हि मधुपुरनिवासिनो लवणाख्यराक्षसस्य निहन्ता । एतद्विवरणं रामायणे उत्तरकाण्डे ७३ अध्यायमारभ्य द्रष्टव्यम् ॥ * ॥ शत्रुहन्तरि, त्रि । यथा, रामायणे । २ । १ । १ ।
“गच्छता मातुलकुलं भरतेन तदानघः ।
शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥”)

शत्रुघ्नजननी, स्त्री, (शत्रुघ्नस्य जननी ।) सुमित्रा । इति शब्दरत्नावली ॥

शत्रुजित्, पुं, (शत्रून् जयतीति । जि + “सत्सूद्विषेति ।” ३ । २ । ६१ । इति क्विप् । ततस्तुक् ।) राजविशेषः । तस्य पुत्त्रः ऋतध्वजः । स एव कुवलयाश्वः । इति मार्कण्डेयपुराणम् ॥

शत्रुञ्जयः, पुं, विमलाद्रिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, रामायणे ।२।३२।१०।
“नागः शत्रुञ्जयो नाम मातुलोऽयं ददौ मम ।
तं ते निष्कसहस्रेण ददामि द्विजपुङ्गव ॥”
शत्रुं जयतीति । जि + “संज्ञायां भृतॄवृजीति ।” ३।२।४६ । इति खच् । ततो मुम् । ) शत्रुजेतरि, त्रि ॥

शत्रुन्तपः, त्रि, (शत्रुं तपति तापयति वा । तप + “संज्ञायां भृतॄवृजीति ।” ३ । २ । ४६ । इति खच् । ततो मुम् ।) वैरितापकृत् । इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । ४ । ५२ । ११ ।
“शत्रुन्तपः कोपममृष्यमाणः
समर्द्दयत् कुर्म्मनखेन पार्थम् ॥”)

शत्रुमर्द्दनः, पुं, (शत्रुं मृद्नातीति । मृद + ल्युः ।) शत्रुघ्नः । इति शब्दरत्नावली ॥ (शत्रुहन्तरि, त्रि । यथा, कथासरित्सागरे । ४२ । १२५ ।
“अथास्ते यमदंष्ट्राख्यः स्वामी नः शत्रुमर्द्दनः ॥”)

शत्वरी, स्त्री, रात्रिः । इति त्रिकाण्डशेषः ॥

शद, ऌ ज औ शाते । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-सक० च-अनिट् । ) ऌ, अशदत् । ज, शादः शदः । औ, शत्स्यति । शातः पतनं पातनञ्च । शीयते पत्त्रं वृक्षात् वायुः । शदोऽपि ममित्यस्मिन्विषये आत्मनेपदम् । केचिदिमं तुदादौ पठित्वा तत्सामर्थ्यात् आत्मनेपदानित्यत्वे शीयतौ शीयन्तीत्युदाहरन्ति । इति दुर्गादासः ॥

शद, औ गतौ । आङ्पूर्व्वोऽयमिति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-अनिट् । ) तालव्यादिः । आशीयते । औ, आशात्सीत् । इति दुर्गादासः ॥

शदः, पुं, फलमूलादिः । शदधातोरच्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शद्रिः, पुं, ( शीयते इति । शद + “अदिशदिभूशुभिभ्यः क्रिन् ।” उणा० ४ । ६५ । इति क्रिन् ।) मेघः । जिष्णुः । इति मेदिनी ॥ हस्ती । इत्युणादिकोषः ॥

शद्रिः, स्त्री, ( शद गतौ + “अदिशदीति क्रिन् । ) विद्युत् । इति हेमचन्द्रः ॥ खण्डः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शद्रुः, त्रि, (शद शाते + “दाधेट्सिशदसदो रुः ।” ३ । २ । १५९ । इति रुः ।) पतनकर्त्ता । गन्ता । इति शदधातो रुप्रत्ययेन निष्पन्नमेतत् । इति व्याकरणम् ॥

शनकावलिः, स्त्री, गजपिप्पली । इति शब्दचन्द्रिका ॥

शनपर्णी, स्त्री, ( शनस्येव पर्णान्यस्याः । ङीष् । पृषोदरादित्वात् णस्य नः । ) कटुकी । इति शब्दचन्द्रिका ॥

शनिः, पुं, रव्यादिनवग्रहान्तर्गतसप्तमग्रहः । तत्पर्य्यायः । सौरिः २ शनैश्चरः ३ । इत्यमरः ॥ नीलवासाः ४ मन्दः ५ छायात्मजः ६ । इति त्रिकाण्डशेषः ॥ पातङ्गिः ७ ग्रहनायकः ८ छायासुतः ९ भास्करिः १० नीलाम्बरः ११ । इति शब्दरत्नावली ॥ आरः १२ क्रोडः १३ वक्रः १४ कोलः १५ सप्तांशुः १६ पङ्गुः १७ । इति जटाधरः ॥ कालः १८ सूर्य्यपुत्त्रः १९ असितः २० । इति ज्योतिस्तत्त्वम् ॥ अस्य वर्णः कृष्णः । पश्चिमदिङ्नपुंसकान्त्यजजातितमोगुणकषायरसमकरकुम्भराशिनीलकान्तमणिसौराष्ट्रदेशानामधिपतिरयम् । कश्यपमुनिसन्तानः । शूद्रवर्णः । सूर्य्यसुखः । चतुरङ्गुलपरिमाणः । कृष्णवर्णवस्त्रः । गृध्रवाहनः । सूर्य्यपुत्त्रः । चतुर्भुजः । भल्लबाणवरशूलधनुर्धारी । अस्याधिदेवता यमः । प्रत्यधिदेवता प्रजापतिः । इति ग्रहयागतत्त्वबृहज्जातकादयः ॥ अपि च ।
“शनिर्विहङ्गोऽनिलवन्यवन्ध्या
शूद्राङ्गना धातुसमः स्थिरश्च ।
क्रूरः प्रतीची तुवरोऽतिवृद्धो-
ऽकर्चितीट दीर्घसुनीललौहम् ॥”
इति नीलकण्ठीयजातकम् ॥ * ॥